संस्कृतवार्ताः

14.09.25

सायम्  - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा अद्य गोलाघाट-जनपदे जैव-इथेनॉल-संयन्त्रं पॉलीप्रोपलीन-अन्विर्तिं समेत्य विविध-परियोजनानां उद्घाटनं विहितम् , इतः पूर्वं असौ दरांग-जनपदे त्रिषष्टिशत-कोटिरुप्यतोऽप्यधिकानां परियोजनानां चापि उद्घाटनम् अकरोत्।

· केन्द्रीय-गृहमन्त्रिणा अमितशाहेन कालानुक्रमेण हिन्दीभाषायाः अनुकूलतया निर्माणाय सहैव क्षेत्रीयभाषाभिः सह तस्याः सह-अस्तित्वं स्थापनाय च आग्रह: प्रकटित:।

· भारत-ऋतु-विज्ञान-विभागेन अद्य बिहार-पश्चिमबङ्गाल, असम-मेघालय- सिक्किम्-राज्यानां पृथक्-पृथक् स्थानेषु अतिवृष्टेः पूर्वानुमानं प्रकटितम् ।

· विश्व-मुष्टामुष्टी-प्रतियोगितायां मीनाक्षी हुड्डा इत्यनया महिलानां अष्टचत्वारिंशत् किलोग्राम भारवर्गे नाज़िम काइजेबे इत्येतां पराजित्य स्वर्णपदकं विजितम्।

· पुरुषक्रिकेट्-क्रीडायां अद्य सायं दुबईनगरे प्रचल्यमाणायाः विंशति-प्रतिविंशति-एशियाकप-प्रतियोगितायाः अ-समूहस्य सङ्घर्षे भारतीयदलं पाकिस्तान-दलं सम्मुखी-करिष्यति।

<u>प्रधानमन्त्री-असमयात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य असम-राज्ये त्रिशताधिक-षट्सहस्र-कोटिरूप्यकाणां प्रमुखसंरचनायाः औद्योगिकविकासस्य च परियोजनानां उद्घाटनम् अकरोत्। अस्मिन् अवसरे सः दरांग-जनपदस्य मंगलदोयी-क्षेत्रे जनान् सम्बोधितवान्। असौ प्रोक्तवान् यत् भारतं विश्वस्य द्रुतगत्या वर्धमानः देशः अस्ति तथा च असम-राज्यं देशस्य द्रुतगत्या वर्धमानेषु राज्येषु अन्यतमम् अभवत्। श्रीमोदी अवदत् यत् विकसितभारतस्य निर्माणार्थं देशः संयुक्तरूपेण अग्रे गच्छन् अस्ति तथा च अस्य संकल्पस्य प्राप्तये पूर्वोत्तरस्य महती भूमिका अस्ति।

सः अवदत् यत् एकविंशतितमायाः शताब्द्याः पञ्चविंशति-वर्षाणि गतानि, अधुना अस्याः शताब्द्याः अयं अग्रिमः भागः देशस्य वैश्विकपूर्वस्य पूर्वोत्तरस्य च वर्तते ।

प्रधानमन्त्री अवदत् यत् तस्य सर्वकारः पूर्वोत्तरे सम्पर्क-विषये बहु ध्यानं ददाति यतः कस्यापि क्षेत्रस्य द्रुतविकासाय द्रुत-सम्पर्कः अतीव महत्त्वपूर्णः भवति।

दरांग-नगरे केन्द्रीयमन्त्रिणा सर्बानन्द-सोनोवालेन, असम-राज्यस्य मुख्यमन्त्रिणा हिमान्ता-बिस्वा-सरमणा च प्रधानमन्त्रिणः नरेन्द्रमोदिनः सम्मानं कृतम्।

विकास-प्रकल्पेषु दरांग-चिकित्सकीय-महाविद्यालयः तथा चिकित्सालयः, जी.एन.एम.विद्यालयः, बी.एस.सी. नर्सिंग-महाविद्यालयाश्च सम्मिलिताः सन्ति, इमे अस्मिन् क्षेत्रे चिकित्सा-शिक्षायाः, स्वास्थ्य-सेवायाश्च सुदृढीकरणं करिष्यन्ति।

<u>प्रधानमन्त्री-जैवइथेनॉलसंयन्त्रम्</u>

ऊर्जाक्षेत्रे भारतं आत्मनिर्भरतायाः लक्ष्यं प्राप्तुं विदेशीय-इन्धनानां अवलम्बनम् न्यूनीकरोतीति प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तम् । सः अद्य अपराह्णे गोलाघाट-जनपदे भारतस्य प्रथमं वंशाधारितं जैव-परिशोधकम् उद्घाटितवान्। जैव-इथेनाल-संयन्त्रस्य उद्घाटनावसरे विशालजनसभां सम्बोधयन् प्रधानमन्त्री अवदत् यत् भारतं स्वस्य गभीरजल-ऊर्जा-संसाधनानां उपयोगेन ऊर्जायाः स्वावलम्बनं सुदृढीकरिष्यति तथा च एतत् जैव-इथेनाल्-संयन्त्रं तल्लक्ष्यं प्राप्तुं कश्चन पदक्षेपः वर्तते। प्रधानमन्त्री सूचितवान् यत् सौरोर्जाक्षेत्रे भारतं पञ्चसु प्रमुखराष्ट्रेषु अन्यतमम् अस्ति । अद्य सायङ्काले असम-राज्ये स्वकार्याणि परिसमाप्य, प्रधानमन्त्री जोरहाट-विमानस्थानकात् कोलकत्ता-नगरं प्रति प्रस्थास्यति। अवसरेऽस्मिन् असम-राज्यस्य मुख्यमन्त्री हिमन्ता-बिस्वा-सरमा, केन्द्रीय-नौवहन-जलमार्ग-मन्त्री सर्बानन्द-सोनोवालः, केन्द्रीय-पेट्रोलियम्-प्राकृतिक-गैस-मन्त्री हरदीप-सिङ्घ-पुरी इत्येतान् समेत्य अन्ये गणमान्याः अपि उपस्थिताः आसन्।

<u>शाह-गुजरात-हिन्दीसम्मेलनम्</u>

केन्द्रीय-गृहमन्त्री अमितशाहः कालानुक्रमेण हिन्दीभाषायाः अनुकूलतया निर्माणाय सहैव क्षेत्रीय-भाषाभिः सह तस्याः सह-अस्तित्वं वर्धयितुं च आग्रहं प्रकटितवान्। गान्धीनगरस्य महात्मा-मन्दिरे हिन्दी-दिवसस्य, पञ्चमस्य अखिल-भारतीय-राजभाषा-सम्मेलनस्य च उद्घाटनं कुर्वता , मन्त्रिणा नागरिकाः स्वमातृ-भाषायाः सम्मानेन सह हिन्दी-भाषायाः समर्थनार्थमपि आहूताः। सः अवदत् यत् केन्द्र-सर्वकारेण हिन्दी-भाषां सुलभतरं कर्तुं सारथि-मञ्चः, हिन्दी-शब्दसिन्धु-कोष-सदृशाः

उपक्रमाः प्रवर्तिताः सन्ति। असौ सबलं प्रावोचत् यत् हिन्दी न केवलं वार्तालापस्य भाषा भवेत्, अपितु विज्ञानस्य, तन्त्रज्ञानस्य, न्यायस्य, रक्षाकर्म्मणः चापि भाषा भवेत् ।

ऋतु- विज्ञान-विभाग:

भारत- ऋतु- विज्ञान-विभागेन अद्य बिहार- उपहिमालयीय-पश्चिमबङ्गाल, अरुणाचलप्रदेश-असम- मेघालय-गोवा- सिक्किम्-राज्यानां पृथक्-पृथक् स्थानेषु प्रचण्डतः अतिवृष्टेः पूर्वानुमानं प्रकटितम्। उत्तराखण्डे, हिमाचलप्रदेशे, छत्तीसगढे, आन्ध्रप्रदेशे, मध्यप्रदेशे, महाराष्ट्रे, नागालैण्ड् राज्ये, मणिपूरे, मिजोरम राज्ये, त्रिपुरायां, उत्तरीय-कर्नाटके, ओडिशायां, तेलङ्गानायां चापि श्वः यावत् प्रचण्डवृष्टिः भविष्यति इति विभागेन पूर्वानुमानितम्। जम्मू-कश्मीर्-लद्दाख्- गिलगित-बाल्टिस्तान-मुज़फ़्फ़राबाद,-तेलङ्गानाप्रदेशेषु आगामिषु द्वित्रिदिनेषु मेघगर्जनस्य विद्युत्-द्योतनस्य च स्थितिः भवितुम् अर्हति।

केरल-असम्ब्ली

केरलविधानसभायाः सत्रं श्वः तिरुवनन्त-पुरम्-नगरे आरभ्यते। द्वादशदिवसीयं सत्रं मुख्यतया विधेयकेषु केन्द्रितं भविष्यति, तथा नवदिनानि अस्य कृते समर्पितानि भविष्यन्ति। सर्वकारः मानवनिवास-क्षेत्रेषु प्रविष्टानां वन्यजीवानां निष्पादनस्य प्रक्रियां सरलीकर्तुं विधेयकं प्रस्तोतुं योजनां करोति।

पञ्जाब्-मुरुगनः

सूचना-प्रसारण-राज्यमन्त्री एल्. मुरुगनः, यः पञ्जाब्-राज्यस्य द्वि-दिवसीय-यात्रायाम् आसीत्, सः अवदत् यत् राज्यस्य जलप्रलयेन पीडितैः सह स्थातुं एषः समयः अस्ति । मन्त्री अवदत् यत् केन्द्रसर्वकारः राज्येण, तस्य जनैः च सह स्थितः अस्ति ,येन तेभ्यः संकटात् निष्कासनाय आवश्यकं सर्वं साहाय्यं प्रददाति। सः अवदत् यत् केन्द्रम् सहयोगप्रदानाय राज्यसर्वकारेण सह समन्वयं कुर्वन् अस्ति इति। सः स्पष्टीकृतवान् यत् पञ्जाब्-राज्येण पूर्वमेव अवशिष्टानां द्वादशसहस्रकोटि-रूप्यकाणां प्रथमं राज्य-आपत्-प्रतिक्रिया-कोषस्य अन्तर्गतं उपयोक्तव्यं भवति, ततः राज्यसर्वकारेण अधिकं धनं याचयितुं स्वस्य उपयोग-प्रमाणपत्रं समर्पणीयम् इति।

## विश्व-मुष्टामुष्टी-प्रतियोगिता

विश्व-मुष्टामुष्टी-प्रतियोगितायां मीनाक्षी हुड्डा इत्यनया महिलानां अष्टचत्वारिंशत् किलोग्राम भारवर्गे नाज़िम काइजेबे इत्येतां पराजित्य स्वर्णपदकं विजितम्।

## क्रिकेट-एशियाचषकः

पुरुषक्रिकेट्-क्रीडायां अद्य सायं दुबईनगरे प्रचल्यमाणायाः विंशति-प्रतिविंशति-एशियाकप-प्रतियोगितायाः अ-समूहस्य सङ्घर्षे भारतीयदलं पाकिस्तानं सम्मुखीकरिष्यति। क्रीडायाः आरम्भः भारतीय-समयानुसारं रात्रौ अष्टवादने भविष्यति। अस्मिन् वर्षे फरवरीमासात् परं प्रथमवारं एतयोः दलयोः मध्ये क्रीडा-द्वन्द्वं भवति।

।।इति वार्ता:।।